श्री कुब्जिका वर्णन स्तोत्रं

श्री कुब्जिका वर्णन स्तोत्रं

नीलोत्पलदळश्यामा षड्वक्त्रा षट्प्रकाशका |
चिच्छक्तिरष्टादशाख्या बाहुद्वादशसंयुता || 1 ||

सिंहासनसुखासीना प्रेतपद्मोपरिस्थिता |
कुलकोटिसहस्राख्या कर्कोटो मेखलास्थितः || 2 ||

तक्षकेणोपरिष्टाच्च गले हारश्च वासुकिः |
कुलिकः कर्णयोर्यस्याः कूर्मः कुंडलमंडलः || 3 ||

भ्रुवोः पद्मो महापद्मो वामे नागः कपालकः |
अक्षसूत्रं च खट्वांगं शंखं पुस्तं च दक्षिणे || 4 ||

त्रिशूलं दर्पणं खड्गं रत्नमालांकुशं धनुः |
श्वेतमूर्धं मुखं देव्या ऊर्ध्वश्वेतं तथाऽपरं || 5 ||

पूर्वास्यं पांडुरं क्रोधि दक्षिणं कृष्णवर्णकं |
हिमकुंदेंदुभं सौम्यं ब्रह्मा पादतले स्थितः || 6 ||

विष्णुस्तु जघने रुद्रो हृदि कंठे तथेश्वरः |
सदाशिवो ललाटे स्याच्छिवस्तस्योर्ध्वतः स्थितः |
आघूर्णिता कुब्जिकैवं ध्येया पूजादिकर्मसु || 7 ||

इत्याग्नेये महापुराणे कुब्जिकापूजाकथनं नाम चतुश्चत्वारिंशदधिकशततमोऽध्याये कुब्जिका वर्णन स्तोत्रं |